Introduction

Smt. Hansa Mehta Library, The M. S. University of Baroda

# भूमिका

जगत्यस्मिन् मानवाः श्रेष्ठतराः सन्ति सृष्टौ इति। यतो हि स्वमनसि ये विचाराः समायान्ति ते यस्यां कस्यां अपि भाषायां प्रकटितुं शक्यन्ते, नैतादृशा शक्तिः अन्येषां जीवानामिति। भाषाः संसारे नैकाः सन्ति। यावत्याः भाषाः श्रूयन्ते वदन्ति च जनाः ता सर्वाः नैवसम्पूर्णा, नैवमोक्षकराः नैव कल्याणकराश्चेति। तत्राऽपि देववाणी (संस्कृतम्) पूर्वोक्त गुणाः संश्लिष्टा वर्तन्ते। यतो हि अस्यां भाषायां वेदाः ये भगवतः निस्वसिताः सन्ति। अत एव मोक्षकरा, कल्याणकरा, वृहत्तराचेति संस्कृत भाषा।

संस्कृतवाङ्मये वेदाः मूर्धन्या सन्ति। अस्य कलेवरं अतीव विस्तृतम् वर्तते। वेदादेव अनेकानि शास्त्राणि निःसृतानि जातानि। वेदस्य हि षट्स्वंगेष्वनेकानि शास्त्राणि सन्तिः -

**शब्दशास्त्रं मुखं ज्यौतिषं चक्षुषी श्रोतमुक्तं निरुक्तं च कल्पः करौ।**
**यातु शिक्षाऽस्य वेदस्य सा नासिका पादपद्द्वयं छन्द आद्यैबुधैः।**

ज्योतिषं हि वेदस्य चक्षुरूपेण स्मर्यते। यथा-

**वेदाचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।**
**संयुतोऽपीतरैः कर्णनासादिभि श्चक्षुषाऽङ्ग हीनो न किञ्चित्करः।।**

ज्योतिषशास्त्रस्य शास्त्रात्वेन आर्विभावः शास्त्रान्तर समकालिकैव कथ्यते हि वैदिकसंहितासु तत्र तत्रोपवर्णितम्। ज्योतिविषयमादाय लगधानम्ना मुनिना प्रणीतो वेदाङ्ज्योतिषाख्यो ग्रन्थः एवं विषयेऽस्मिन् प्रथमः इति। ज्योतिषशास्त्रप्रवर्तकत्वेन तत्र तत्र सूर्यादयोऽष्टदश ऋषयः स्मर्यन्ते। ग्रन्थ कर्तृषु शास्त्रेऽस्मिन् लगधात्परम् आर्यभट्ट- लल्ल ब्रह्मगुप्त वराहमिहिर - श्रीपति - भास्कराचार्य- मुनीश्वर - ज्ञानराज- कमलाकर भट्टाः प्रधान्येन स्मर्यन्ते श्रीधरवटेश्वर - मुञ्जालदयच । नवीनेषु नीलाम्बरबापूदेव-सुधाकर - शङ्करबालकृष्ण योगेशचन्द्र- केतकर- आप्टेप्रभृतयो विद्वांसः परिगण्यन्ते गणकत्वेन।

इदं शास्त्रं त्रिषुस्कन्धेषु विभक्तं इति।
सिद्धान्त संहिता होरारूपं स्कन्धत्रयत्मकम्।
वेदस्य निर्मलं चक्षुज्योतिः शास्त्रमनुत्मम्।।

**अस्य शास्त्रस्य प्राचीनाचार्याः ये सन्ति –**

सूर्यः पितामहो व्यासो वसिष्ठोऽत्रि पराशरः।
कश्यपो नारदो गर्गो मरीचिर्मनुरङ्गिराः।।
रोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टा दशाश्चेते ज्योतिः शास्त्रप्रवर्तकाः।। इति।

**शोधप्रबन्धविषये**

सूर्यसिद्धान्तः अग्रे ज्ञानभास्कररूपेण अनेकैः विद्वद्भिः स्वीकृतः। अद्यापि ज्ञानभास्करः – इति नाम्ना सप्तपुस्तकानि हस्तलिखितानि प्राप्तानि भवन्ति। तत्रानेकानि प्रकरणानि सन्निहितानि सन्ति। ज्योतिषस्य अनेकेषु ग्रन्थेषु ज्ञानभास्कोरक्तस्य सिद्धान्ताः फलादेशाः अन्यान्यपि च वस्तूनि प्राप्तानि भवन्ति। किन्तु अद्यावधिपर्यन्तम् ज्ञानभास्करमवलम्ब्य किंचिदपि कर्यम् कोऽपि न कृतवान्

अस्मिन् ग्रन्थे अनेकानि प्रकरणानि अतीवउपयोगिरूपेण भवितुमर्हन्ति। इति मनसा विचार्य अत्युपयोगिता रूपेण प्रकरणत्रयाणामेवाध्यनम् ज्योतिषाधीत छात्राणां अध्येतृणाञ्च कृते शोधविषयं स्वीकृत्य कार्यम् कर्तुमुत्सहे। अनेकेषु विश्वविद्यालयेषु अनुसंधान केन्द्रेषु च ज्ञानभास्करस्य हस्तलिखितग्रन्था उपलभ्यन्ते। अस्माकं प्राच्यविद्यामन्दिरे (वडोदरा म.स.विश्वविद्यालय वडोदरा गुजरात) इति संस्थानेऽपि हस्तलिखितप्रतिलिपि विद्यते। तां सम्प्राप्य कार्यमेतत् कृतिमिति। तत्राऽपि मौलिकत्वेन संस्कृतैव पद्यानि सन्निहितानि सन्ति । अतो हि प्रकरणत्रयाणां संस्कृते अनुवादः दत्तं मया। अस्यैऐतिहासिकत्वविषये यत् किञ्चित् प्राप्तं तदपिउल्लेखः कृतःमयेति।

2. **विवेच्य विषयस्य विभाजनम् –**

ऐतेषां प्रकरणानां विवेचनम् **सप्तसु अध्यायेषु** अस्ति। तद्यथा –

**प्रथमे हि** ज्योतिषशास्त्रस्य सामान्यपरिचयः अस्य शास्त्रस्य मानवजीवने का उपयोगिता एवं कालानुसारेण वैविध्यम् इत्यादिकम् वर्णितम्।

ज्योतिषशास्त्रस्य ऐतिहासिकत्व विषये **द्वितीयेऽध्याये** वर्णितम्। तत्र प्रथमंम ज्योतिषशास्त्रस्य प्रमुखाचार्याः तेषां ग्रन्थानां विवेचनम् प्रस्तुतम्। तदुपरान्ते (सौर) ज्योतिषसिद्धान्तस्य किमैतिहासिकत्वम् तथा च सिद्धान्तकालिक– आचार्याणां तथा

तत्कालिकग्रन्थानां विवेचनम् वर्तते।

आलोच्यप्रकरणत्रयस्य परिचयात्मको **तृतीयोध्याय:** वर्तते। तत्र ज्ञानभास्करग्रन्थकर्तु: विषयादीनां निमेशनं कृतम्। ज्ञानभास्करोक्तान्येकानि प्रकरणानि विषया: तथा च आलोच्य प्रकरणत्रयस्य वर्णनं वर्तते। अनेन सह होराशास्त्रास्य वैशिष्ठ्यम् अपि तत्र प्रस्तुतम्।

**चतुर्थाध्याय** ज्योतिषविषये सामान्यपरिचय: तत्र ज्योतिषे वर्गादीनां निरूपणम् षड्वर्गस्य वैशिष्ट्यम् पूर्वजन्मस्य कर्मानुसारेण कर्मविपादाकिफलकथनम् तथा च मेषादिद्वादशलग्नानां निरूपणं वर्तते।

ज्ञानभास्करोक्त प्रकरणत्रयाणां समीक्षात्मकमध्ययनम् **पञ्चमेध्याये** वर्तते। तत्रादौ षड्वर्गज्ञानं षड्वर्गमध्ये सूर्यादिग्रहाणां लग्नादिद्वादशभावस्थित शुभाशुभफलकथनं वर्तते। होराशास्त्रे कर्मविपाकादिफलकथनमपि अत्रैव वर्तते। मेषादिद्वादशलग्नानां फलकथनम् (संचित्कर्मफलम्) पूर्वजन्मस्य शुभा-शुभकर्मण: फलादिवर्णनं वर्तते। प्रकरणत्रयस्य व्याख्याऽपि अस्मिन् अध्याये एव वर्तते।

**षष्ठे** ज्योतिषीयग्रन्थेषु वर्णित वर्गसाधनादीनां भेदानां च विवेचनम् कीदृशमिती तस्य निरूपणम् भेदत्रेय होराशास्त्रस्य वैशिष्टयम् अनेन सह विविधाचार्याणां द्वादशलग्नानां फलकथनादिकमिप अत्र योजितम् । अन्य ग्रथानां प्रकरणत्रयस्य विवेचनम् कुत्र-कथं- कीदृशं च दृश्यते तेषां सर्वेषामत्रैवोपनिवद्धम्।

ज्योतिषशास्त्रे एतेषां विवेचितप्रकरणत्रयाणां का उपयोगिता को हेतु: किं वैविध्यम् च इत्यपि अत्र संश्लिष्टम् वर्तते। प्रकरणत्रयाणामध्ययनात् ज्योतिषशास्त्रे किमवदानम् दृश्यते इत्यपि **सप्तमे** च विवेचनम् कृतम् मया।

**पर्यन्ते** चास्यशोधप्रबन्धे उपसंहार परिशिष्टरूपेण च संदर्भ ग्रन्थनामानि योजितानि।

विषयस्यास्य पूर्णताया: पूर्वम् उपकारिजानानां स्मरणं परमावश्यकम्। प्रथमै हि भगवत: भूतभावन: भुवनेश्र्वर (श्री त्रितापहरेश्र्वर महादेव:) मेघनगरस्थेश्र्वर: तथा च मनोकामनापूर्ण हनुमान इति विख्यात: रामकिंकर: श्री आंजनेय इत्यनयो: चरणप्रसादादेव शोधप्रबन्धो अयं सम्पूर्ण: जात:। दौर्भाग्येन स्वर्गस्थानां पूज्यचरणानां श्री कुमारिल भाई ह. शुक्लमहाभागनां कार्तज्ञम् विभर्मि। एभि: सह समादरणीयानां सर्वशास्त्रसम्पनानां श्री उदयनकुमार ह.

शुक्लमहोदयानामपि कार्तज्ञम् स्मरामि, अनुभवामि च। यैः नैकवारं शोधकार्ये उत्साहं वर्धनाय प्रेरणा शक्तिश्च प्रदत्ता इति।

सांसारिक,-पारिवारिक,-सामाजिक, आध्यात्मिक, कार्याणां सम्पन्नता येनेंविना न पूरिता भवितुं अर्हति, तद् वैशिष्ट्यानां मम पूज्य पितृचरणानां श्री ठाकुरप्रसाद शर्मणां अर्शीवचोभिः मममनसी सर्वदा- सर्वथा- सर्वकाले अनुभवं प्राप्य कार्यं कृतमिति। तेषां विषये नैवशब्दाः कृतज्ञतार्थमिति। तद्वदेव मातृ (टीकादेव्याः) चरणानामपि अनेनसह भातृभ्यां द्वाभ्यां- लेखनाथ-धर्मराज शर्मणां इति सहायय्म् प्राप्तं तदनुभूय धन्यवादार्हौ इति। मम भगिनी अतीवप्रीयतरायाः पार्वती तस्याः अपि अत्र सहायतां प्राप्य कृतज्ञतां अनुभवमि। नैकवारं शोधकार्ये उत्साह वर्धनाय प्रेरणा प्रपूरिता तथैव .भार्या भार विमोचनाय ज्ञ मम धर्मपत्नी लक्ष्मीदेव्याः अपि सहायता परिवर्तते, मया गृहभारतः विमुक्तिः प्रदत्ता।

अन्येच यानिमित्राणि सन्ति तेषां श्री मेदनीप्रसाद दाहाल- श्री हरीहर गौतम- श्री भवानीप्रसाद आचार्य -मौलेश - मृत्युजय - दिक्षीत पाठक- हरिओम इत्येषां समेषां विदुषां मित्रवर्याणांच कार्तज्ञ म् अनुभवाम्यहम् । एतेषां उपरिस्थानां कृतज्ञतां ज्ञापितवान्।

पर्यन्ते च प.पू. श्री डॉ. रामपालशुक्लानां गुरूवर्याणां न शब्दैः नवा अन्यप्रकारैः कृतज्ञतां दर्शायितुं शक्नोमि। सदैव छात्राणां हितेच्छ्वः पिपठिषूणां सहायकृतः वर्तन्ते। सर्वदा छात्राणाम् अनुकूलतायां स्वानुकूल्यं कुर्वन्ति। पदे - पदे च एतैः दिशानिर्देशः कृतः एतेषां दीर्घायुषे प्रार्थनां कुर्वे येन संस्कृतस्य संस्कृतेश्च्व प्रचार- प्रसारस्य संवर्धनं भवेत्।

अन्ते च शोधप्रवन्धेऽस्मिन् याश्च काञ्चन् त्रुट्यो भवेयुः ताः क्षन्तव्याः।

—विदुषां वशंवदः